# pa nchapa nchAshadviShNunAmANi

# પઞ્ચપઞ્ચાશદ્વિષ્ણુનામાનિ

## Document Information

Text title : panchapanchAshadviShNunAmAni

File name : panchapanchAshadviShNunAmAni.itx

Category : vishhnu, vishnu

Location : doc_vishhnu

Author : Traditional

Proofread by : Sunder Hattangadi

Source : Agnipurana, adhyAya 304/305

Latest update : January 16, 2017

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# પઞ્ચપઞ્ચાશદ્વિષ્ણુનામાનિ

અગ્નિરુવાચ -
જપન્ વૈ પઞ્ચપઞ્ચાશદ્વિષ્ણુનામાનિ યો નરઃ ।
મન્ત્રજપ્યાદિફલભાક્તીર્થેષ્વર્ચાદિ ચાક્ષયમ્ ॥ ૧॥

પુષ્કરે પુણ્ડરીકાક્ષં ગયાયાઞ્ચ ગદાધરમ્ ।
રાઘવઞ્ચિત્રકૂટે તુ પ્રભાસે દૈત્યસૂદનમ્ ॥ ૨॥

જયં જયન્ત્યાં તદ્વચ્ચ જયન્તં હસ્તિનાપુરે ।
વારાહં વર્ધમાને ચ કાશ્મીરે ચક્રપાણિનમ્ ॥ ૩॥

જનાર્દનઞ્ચ કુબ્જામ્રે મથુરાયાઞ્ચ કેશવમ્ ।
કુબ્જામ્રકે હૃષીકેશં ગઙ્ગાદ્વારે જટાધરમ્ ॥ ૪॥

શાલગ્રામે મહાયોગં હરિં ગોબર્ધનાચલે ।
પિણ્ડારકે ચતુર્વાહું શઙ્ખોદ્ધારે ચ શઙ્ખિનમ્ ॥ ૫॥

વામનઞ્ચ કુરુક્ષેત્રે યમુનાયાં ત્રિવિક્રમમ્ ।
વિશ્વેશ્વરં તથા શોણે કપિલં પૂર્વસાગરે ॥ ૬॥

વિષ્ણું મહોદધૌ વિદ્યાદ્ગઙ્ગાસાગરસઙ્ગમે ।
વનમાલઞ્ચ કિષ્કિન્ધ્યાં દેવં રૈવતકં વિદુઃ ॥ ૭॥

કાશીતટે મહાયોગં વિરજાયાં રિપુઞ્જયમ્ ।
વિશાખયૂપે હ્યજિતન્નેપાલે લોકભાવનમ્ ॥ ૮॥

દ્વારકાયાં વિદ્ધિ કૃષ્ણં મન્દરે મધુસૂદનમ્ ।
લોકાકુલે રિપુહરં શાલગ્રામે હરિં સ્મરેત્ ॥ ૯॥

પુરુષં પૂરુષવટે વિમલે ચ જગત્પ્રભુમ્ ।
અનન્તં સૈન્ધવારણ્યે દણ્ડકે શાર્ઙ્ગધારિણમ્ ॥ ૧૦॥

ઉત્પલાવર્તકે સૌરીં નર્મદાયાં શ્રિયઃ પતિમ્ ।

દામોદરં રૈવતકે નન્દાયાં જલશાયિનમ્ ॥ ૧૧॥

ગોપીશ્વરઞ્ચ સિન્ધ્વબ્ધૌ માહેન્દ્રે ચાચ્યુતં વિટુઃ ।
સહાદ્રૌ દેવદેવેશં વૈકુણ્ઠં માગધે વને ॥ ૧૨॥

સર્વપાપહરં વિન્ધ્યે ઔડ્રે તુ પુરુષોત્તમમ્ ।
આત્માનં હૃદયે વિદ્ધિ જપતાં ભુક્તિમુક્તિદમ્ ॥ ૧૩॥

વટે વટે વૈશ્રવણં ચત્વરે ચત્વરે શિવમ્ ।
પર્વતે પર્વતે રામં સર્વત્ર મધુસૂદનમ્ ॥ ૧૪॥

નરં ભૂમૌ તથા વ્યોમ્નિ વશિષ્ઠે ગરુડધ્વજમ્ ।
વાસુદેવઞ્ચ સર્વત્ર સંસ્મરન્ ભુક્તિમુક્તિભાક્ ॥ ૧૫॥

નામાન્યેતાનિ વિષ્ણોશ્ચ જપ્ત્વા સર્વમવાપ્નુયાત્ ।
ક્ષેત્રેષ્વેતેષુ યત્ શ્રાદ્ધં દાનં જપ્યઞ્ચ તર્પણમ્ ॥ ૧૬॥

તત્સર્વં કોટિગુણિતં મૃતો બ્રહ્મમયો ભવેત્ ।
યઃ પઠેત્ શ઼ૃણુયાદ્વાપિ નિર્મલઃ સ્વર્ગમાપ્નુયાત્ ॥ ૧૭॥

ઇત્યાગ્નેયે મહાપુરાણે પઞ્ચપઞ્ચાશદ્વિષ્ણુનામાનિ નામ
ચતુરધિકત્રિશતતમોઽધ્યાયઃ ॥ ૩૦૪॥

Proofread by Sunder Hattangadi

*pa nchapa nchAshadviShNunAmANi*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*